तारं मायां तथागच्छानुरागिणि मैथुनप्रिये।
वह्निभार्य्या मनुः प्रोक्तः सर्व्वसिद्धिप्रदायकः॥
एषा मधुमती तु स्यात् सर्व्वसिद्धिप्रदा प्रिये।
गुह्यात् गुह्यतरा विद्या तव स्नेहात् प्रकीर्त्तिता॥ ८॥

देव्युवाच।

श्रुतञ्च साधनं पुण्यं यक्षिणीनां सुखप्रदम्।
यस्मिन् काले प्रकर्त्तव्यं विधिना केन वा प्रभो।
अत्राधिकारिणः के वा समासेन वदस्व मे॥

ईश्वर उवाच।

वसन्ते साधयेद्धीमान् हविष्याशी जितेन्द्रियः।
सदा ध्यानपरो भूत्वा तद्दर्शनमहोत्सुकः॥
उत्कटे प्रान्तरे वापि कामरूपे विशेषतः।
स्थानेष्वेकतमं प्राप्य साधयेत् सुसमाहितः।
अनेन विधिना साक्षात् भविष्यति न संशयः॥
देव्याश्च सेवकाः सर्व्वे परं चात्राधिकारिणः।
तारकब्रह्मणो भक्तं विनाप्यत्राधिकारिणः॥"
इति तन्त्रसारे योगिनीसाधनप्रकरणं समाप्तम्॥
दशविधदशान्तर्गतदशाविशेषः। यथा,—
"स्वनक्षत्रं ध्रुवं कृत्वा पञ्च तत्र विमिश्रयेत्।
मङ्गलेन हृतः शेषो मङ्गलादिविनिश्चयः॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्यष्टौ प्रकीर्त्तिताः॥
अब्दैकं मङ्गला धत्ते शेषास्त्वेकैकवर्द्धिकाः।
पुनस्ताश्चानिवर्त्तन्ते चक्रवत् परिवर्त्तनात्॥"
अपि च।
"रोहिण्यादौ त्रिरावृत्त्या मङ्गलादौ यथाक्रमम्।
उल्का सिद्धा सङ्कटा च अश्विन्यादित्रये पुनः॥"
एतासामन्तर्दशा।
"दशावर्षन्तु षट्त्रिंशद्भागं कृत्वा विनिर्द्दिशेत्।
यत्तु यस्या हि यद्वर्षं तत्तद्भागं प्रकीर्त्तितम्॥"
फलं यथा,—
"मङ्गला मङ्गलं धत्तेऽतुलभोगं सुखं तथा।
गोगजाश्वसहस्राणि गृहे तस्य दिने दिने॥
पिङ्गला विविधं दुःखमन्नचिन्तादिसम्भवम्।
ददाति नाशं शत्रुभ्यो धनधान्यगजादिकम्॥
धन्या च सततं दत्ते सर्व्वत्र विजयादिकम्।
शत्रुभ्यो रक्षते नित्यं मातृवत् परिपालयेत्॥
भ्रामरी विविधं दुःखमन्तःसम्भ्रमसम्भवम्।
अकस्मात्तस्य दुर्द्दैवं विधिना प्रेरितं भवेत्॥
भद्रिका विविधान् धत्ते सम्मानादिमनोरथान्।
तुष्टा चेद्भद्रिका नित्यं दुर्ग्रहः सुग्रहायते॥
उल्का चाधिकरी प्रोक्ता नित्यं नानाभयप्रदा।
उल्का यदि समायाति सुग्रहो दुर्ग्रहायते॥
सिद्धा च साधयेत् सर्व्वं मन्त्रारम्भधनादिकम्।
यस्य तुष्टा भवेत् सिद्धा लक्ष्मीस्तस्य करे स्थिता॥
सङ्कटा सङ्कटं दत्ते भुङ्क्ते धान्यधनादिकम्।
सैव भार्य्या सदा नित्यं गृही ज्ञाः फणी यथा॥"
इत्युद्बोधचन्द्रिका॥

योगी, [न्] पुं, (योगः अस्त्यस्येति। योग + इनिः। यद्वा, युज समाधौ। युजिर् योगे वा + "संपृचानुरुधेति।" ३। २।१४२। इति घिनुण्।) योगयुक्तः। तस्य लक्षणादि यथा,—
"स्वर्णे लोष्टे गृहेऽरण्ये सुस्निग्धे चन्दने तथा।
समता भावना यस्य स योगी परिकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः॥
अपि च।
"आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्जुन!।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥"
इति श्रीभगवद्गीतायाम् ७ अध्यायः॥
अन्यच्च।

ऋषय ऊचुः।

"भगवन्! देवतारिघ्न! हिरण्याक्षनिसूदन!।
चत्वारो ह्याश्रमाः प्रोक्ता योगी नाम क उच्यते॥
सर्व्वकर्म्माणि संन्यस्य समाधिमचलं श्रितः।
य आस्ते निश्चलो योगी स सन्न्यासी न पञ्चमः॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यं श्रुतिदर्शितम्।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः॥
उदासीनसाधकश्च गृहस्थो द्विविधो भवेत्।
ऋणानि त्रीण्युपाकृत्य त्यक्त्वा भार्य्याधनादिकम्॥
एकाकी यस्तु विचरेदुदासीनः स मौक्षिकः।
कुटुम्बभरणायत्तः साधकोऽसौ गृही भवेत्॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत्।
सन्न्यासिकः स विज्ञेयो वानप्रस्थाश्रमे स्थितः॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः।
सम्यग्दर्शनसम्पन्नः स योगी भिक्षुरुच्यते॥
ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनः परे।
कर्म्मसन्न्यासिनः केचित्त्रिविधाः पारमेष्ठिकाः॥
योगी च त्रिविधो ज्ञेयो भौतिकः सांख्य एव च।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमुत्तममास्थितः॥"
इति कौर्म्मे २ अध्यायः॥
(तेषां स्त्रीसङ्गनिषेधो यथा,—
"यदि सङ्गं करोत्येव बिन्दुस्तस्य विनश्यति।
आयुःक्षयो बिन्दुहीनादसामर्थ्यञ्च जायते॥
तस्मात् स्त्रीणां सङ्गवर्ज्जं कुर्य्यादभ्यासमादरात्।
योगिनोऽङ्गस्य सिद्धिः स्यात् सततं बिन्दुधारणात्॥"
इति दत्तात्रेयसंहिता॥
तेषां पथ्यं यथा, हठयोगप्रदीपिकायाम्।
"गोधूमशालियवषष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि।
शुण्ठीपटोलकफलादिकपञ्चशाकं
मुद्गादिदिव्यमुदकञ्च यमीन्द्रपथ्यम्॥"
तेषामपथ्यं यथा, तत्रैव।
"कट्वम्लतिक्तलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमत्स्यमद्यम्।
अजादिमांसदधितक्रकुलत्थकोल-
पिण्याकहिङ्गुलसुनाद्यमपथ्यमाहुः॥")

योगीश्वरः, पुं, (योगिनामीश्वरः।) याज्ञवल्क्य-मुनिः। (इति हेमचन्द्रे योगेशशब्ददर्शनात्॥ ३। ८५१॥) यथा,—
"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः॥"
"योगिनां सनकादीनां ईश्वरः श्रेष्ठस्तं याज्ञवल्क्यं संपूज्य।" इति मिताक्षरा॥ त्रि, यमिनां श्रेष्ठः। (यथा, मार्कण्डेये। ६६। २८।
"यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून्॥")

योगीश्वरी, स्त्री, (योगिनामीश्वरी।) दुर्गा। यथा,—
"योगिशक्रादयो देवाः सनकान्तास्तपोधनाः।
तेषां स्वामी तथा योगी ईश्वरी प्रभुपालना॥
आत्मेन्द्रियमनादीनां संयोगो योग उच्यते।
तेषां वा योजनाद्योगी योगैश्वर्य्यविबोधना॥"
इति देवीपुराणे ४५ अध्यायः॥

योगेशः, पुं, (योगस्य ईशः ईश्वरः।) याज्ञवल्क्यः। इति हेमचन्द्रः। ३। ८५१॥ (योगेश्वरे, त्रि। यथा, भागवते। ४। १८। ६।
"कपिलो नारदो दत्तो योगेशाः सनकादयः।
समन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः॥")

योगेश्वरः, पुं, (योगानां ईश्वरः।) श्रीकृष्णः। यथा,—
"ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म्मवर्म्मणि।
स्वां काष्ठामधुनोपेते धर्म्मः कं शरणं गतः॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः॥
(शिवः। यथा, महाभारते। १३। १४। ३२३।
"नमस्ते भगवन् देव! नमस्ते भक्तवत्सल!।
योगेश्वर! नमस्तेऽस्तु नमस्ते विश्वसम्भव!॥"
देवहोत्रतनयः। यथा, भागवते। ८। १३। ३२।
"देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति॥"

योगेश्वरी, स्त्री, वन्ध्याकर्कोटकी। इति भावप्रकाशः॥ (योगानामीश्वरी। दुर्गा। यथा,—
"त्वञ्च योगेश्वरी तथा—।" इति चण्डीकवचम्॥ योगयुक्ते, त्रि। यथा, मार्कण्डेये। ६७। ८।
"प्रजापतेः कश्यपाय सोमाय वरुणाय च।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः॥")

योगेष्टं, क्ली, (योगे सन्धिच्छिद्रादिपूरणे इष्टम्।) सीसकम्। इत्यमरः। २। ६। १०५॥ (तथास्य पर्य्यायः।
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)

योग्यं, क्ली, (योज्यते इति। युज् + णिच् + ण्यत्।) ऋद्धिनामौषधम्। वृद्धिनामौषधम्। इत्यमरः। २। ४। ११२॥

योग्यः, त्रि, (योगाय प्रभवति। योग + "योगाद्यच्च।" ५। १। १०२। इति यत्।) प्रवीणः। योगार्हः। (यथा, रघुः। ६। २६।